# ह.वि.शि.बो. अभ्यासप्रश्नपत्रम् (मार्च-2024)
# विषय : संस्कृतम्

**कक्षा - द्वादशी** **कोड न. - 526**

**SET : D**

रोल नं० [ ][ ][ ][ ][ ][ ][ ][ ][ ][ ]

समयः - होरात्रयम् ] [ पूर्णाङ्काः - 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :–**

  I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
  II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
  III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 18 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 30 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

## खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

सज्जनानाम् आचारः सदाचारः कथ्यते। जीवने सदाचारस्य स्थानं महत्त्वपूर्णम् अस्ति। आचारवान् पुरुषः सर्वत्र पूज्यते। सदाचारात् एव मनुष्यः दीर्घमायुः वैभवं च प्राप्नोति। यतः यः नरः सर्वलक्षणहीनः अपि अस्ति, परं सदाचारवान् अस्ति, स शतं वर्षाणि जीवति। सद्-व्यवहारस्य बलेनैव मनुष्याः सुन्दरान् गुणान् अर्जयितुं समर्थाः भवन्ति। जनः उन्नतिं करोति। आचारहीनाः जनाः अपवित्राः भवन्ति। सर्वस्य तपसः मूलं सदाचारः एव अस्ति । अतएव सदाचरणं सर्वेषां कृते अत्यावश्यकम् अस्ति।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) सदाचारः कस्य मूलम् अस्ति?
(ख) सदाचारवान् कति वर्षाणि जीवति?
(ग) आचारहीनाः जनाः कीदृशाः भवन्ति?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) सदाचारः कः कथ्यते?

(ख) जीवने कस्य स्थानं महत्त्वपूर्णम् अस्ति?

(ग) सद्-व्यवहारस्य बलेन मनुष्याः किं कर्तुं समर्थाः भवन्ति?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) अस्मिन् गद्यांशे 'लघु' इत्यस्य शब्दस्य कृते किं विलोमपदं प्रयुक्तम्?
(क) वर्षाणि (ख) दीर्घम्
(ग) पुरुषः (घ) सदाचारः

(ii) 'तपसः' इत्यस्मिन् शब्दे का विभक्तिः?
(क) चतुर्थी (ख) पञ्चमी
(ग) षष्ठी (घ) सप्तमी

(iii) 'जनाः' इत्यस्य विशेषणपदं किम्?
(क) आचारहीनाः (ख) सर्वलक्षणहीनाः
(ग) सज्जनानाम् (घ) पुरुषाः

(iv) 'सर्वस्य तपसः मूलं सदाचारः एव अस्ति।' इत्यस्मिन् वाक्ये 'अस्ति' क्रियापदस्य कर्ता कः?
(क) एव (ख) सदाचारः
(ग) प्राणिनाम् (घ) जलम्

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. विषयमेकमधिकृत्य षड्वाक्यानि संस्कृतभाषया लिखत - 6

(क) समयस्य सदुपयोगः

(ख) परोपकारः

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) मम प्रियः कविः

### (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) शिखरिणीछन्दसः लक्षणं किम्?

(ख) मालिनीछन्दसः उदाहरणं किम्?

(ग) उपेन्द्रवज्राछन्दसि कति वर्णाः भवन्ति?

(घ) स्यात् ............... यदि तौ जगौ गः । (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) रुपकस्य अलङ्कारस्य लक्षणं किम्?

(ख) उत्प्रेक्षा-अलङ्कारस्य उदाहरणं किम्?

(ग) उपमा-अलङ्कारस्य लक्षणं किम्?

(घ) श्लिष्टैः पदैरनेकार्थाभिधाने ...................... इष्यते। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः 'ग'

## पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

**अथवा**

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

भगवान् यीशुस्तव मङ्गलं वितनोतु। मम पूर्वतनं पत्रं त्वया प्राप्तं स्यात्। तव समीपे इदं मम शेषपत्रम्। यतोहि मम जीवनप्रदीपो निर्वापितो भवितुमिच्छति। प्रायस्तवागमनसमये अहं न स्थास्यामि।

**अथवा**

इदमेव च पुनः पुनरभिधीयसे – विद्वांसमपि, सचेतसमपि, महासत्त्वमपि, अभिजातमपि, धीरमपि, प्रयत्नवन्तमपि पुरुषं दुर्विनीता खलीकरोति लक्ष्मीरित्येतावदभिधायोपशशाम।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) सुलभसौख्यमिदानीं बालत्वं भवति।

(ख) तटाकोदरसंस्थानां परीवाह इवाम्भसाम्।

(ग) प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः।

(घ) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

इत्यर्घ्यपात्रानुमितव्ययस्य

रघोरुदारामपि गां निशम्य।

स्वार्थोपपत्तिं प्रति दुर्बलाश-

स्तमित्यवोचद्वरतन्तुशिष्यः।।

**अन्वयः :-**

1) .............. अनुमितव्ययस्य रघोः इति 2) ...................... गाम् अपि निशम्य 3) .................. स्वार्थोपपत्तिं प्रति 4) ...................... तम् इति अवोचत्।

**मञ्जूषा**

| |
|---|
| उदाराम्, वरतन्तुशिष्यः, दुर्बलाशः, अर्घ्यपात्रेण |

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

पापान्निवारयति योजयते हिताय गुह्यं निगूहति गुणान् प्रकटीकरोति।
आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

**प्रश्नाः -**

(क) सन्मित्रं कस्मात् निवारयति?

(ख) कः गुणान् प्रकटीकरोति?

(ग) "सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।" अस्मिन् वाक्ये 'प्रवदन्ति' क्रियापदस्य कर्ता कः?

(घ) अत्र 'पुण्यात्' पदस्य विपर्ययः किं पदमस्ति?

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान् भास्करः सिन्दूरद्रव-स्नातानामिव वरुण-दिगवलम्बिनामरुण-वारिवाहानामभ्यन्तरं प्रविष्टः।

(क) अयं गद्यांशः कस्मात् पाठात् सङ्कलितः?

(ख) सायं समये भगवान् भास्करः कुत्र जिगमिषुः भवति?

(ग) 'अभ्यन्तरम्' इत्यस्मिन् पदे कः सन्धिच्छेदः?

(घ) 'प्रविष्टः' इत्यस्मिन् पदे कः प्रत्ययः?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)

4×1=4

| | |
|---|---|
| (क) श्रीनायारः <u>स्वल्पभाषी</u> आसीत्। | (कीदृशः / कीदृशी) |
| (ख) रामभद्रस्य एव दारकः अस्माकं <u>लोचने</u> शीतलयति। | (कस्मिन् / के) |
| (ग) चातकः अपि निर्गलित-अम्बुगर्भं <u>शरद्घनं</u> न याचते। | (किम् / कम्) |
| (घ) मनसोऽपि वेगवान् <u>परमात्मा</u> अस्ति। | (कः / का) |
| (ङ) सन्मित्रं <u>पापात्</u> निवारयति। | (कस्य / कस्मात्) |

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) 'बालकौतुकम्' अयं पाठः उत्तररामचरितस्य कस्मात् अङ्कात् सङ्कलितः?

(ख) शुकनासोपदेशः पाठोऽयं कस्मात् ग्रन्थाद् उद्धृतः?

(ग) श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते?

(घ) 'विक्रमस्यौदार्यम्' अयं पाठः कस्मात् ग्रन्थाद् उद्धृतः?

(ङ) 'दीनबन्धुः श्रीनायारः' अयं पाठः कस्मात् कथासंग्रहात् सङ्कलितः?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) कादम्बरीं विहाय बाणभट्टस्य अन्यत् गद्यकाव्यं किम्?

(ख) नीतिशतकस्य रचयिता कः?

(ग) उत्तररामचरितस्य रचयिता कः?

(घ) अम्बिकादत्तव्यासस्य प्रसिद्धा रचना का?

(ङ) 'पाषाणीकन्या' इत्यस्य कथासंग्रहस्य मूललेखकः कः?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) यण्-सन्धेः अथवा वृद्धिसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) कर्मधारयसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(घ) सम्प्रदानकारकस्य अथवा करणकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

# खण्डः – 'ङ'
# पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

1) 'जहातीह' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

क) जहाति + ईह  ख) जहाति + इह

ग) जहाती + इह  घ) जहाति + ह

2) 'तस्यैव' इत्यस्मिन् शब्दे कः सन्धिः?

क) गुणसन्धिः  ख) व्यञ्जनसन्धिः

ग) विसर्गसन्धिः  घ) वृद्धिसन्धिः

3) 'सः + अपि' इत्यस्य सन्धियुक्तं पदं किम्?

क) सोपि  ख) सोऽपि

ग) सापि  घ) सोऽपी

4) 'कुर्वाणः' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) अण  ख) शानच्

ग) क्त्वा  घ) मयट्

5) 'जवीयः' इत्यस्मिन् शब्दे कः प्रत्ययः?

क) ईयसुन्  ख) ल्यप्

ग) शतृ  घ) यत्

6) 'पटु + तल्' एतेषु संयोगे किं रूपं भवति?

क) पटूता  ख) पटुता

ग) पटुतल्  घ) पटुतः

7) 'दीर्घग्रीवः' इत्यस्मिन् शब्दे कः समासः?

क) बहुव्रीहिः  ख) तत्पुरुषः

ग) अव्ययीभावः  घ) कर्मधारयः

8) 'अस्खलितम्' इत्यस्य शब्दस्य कः विग्रहः?

क) न स्खलितम् | ख) अन स्खलितम्

ग) न अस्खलितम् | घ) स्खलितम न

9) 'जीवनस्य प्रदीपः' अत्र समस्तपदम् किम्?

क) जीवनं प्रदीपः | ख) जीवन प्रदीपः

ग) जीवनप्रदीपः | घ) जीवनस्य प्रदीपः

10) 'दिवसेषु' इत्यस्मिन् शब्दे का विभक्तिः?

क) चतुर्थी | ख) पञ्चमी

ग) षष्ठी | घ) सप्तमी

11) 'अपसर्पत' इत्यस्मिन् शब्दे कः लकारः?

क) लट् लकारः | ख) लृट् लकारः

ग) लोट् लकारः | घ) लङ् लकारः

12) 'नीरजम्' इत्यस्य शब्दस्य पर्यायपदं किम्?

क) साम्प्रतम् | ख) आम्रम्

ग) कमलम् | घ) भूषणम्

13) 'विपक्षे' इत्यस्य शब्दस्य विलोमपदं किम्?

क) विस्मृतम् | ख) सर्वकारे

ग) पक्षे | घ) जीवने

14) 'जवीयः' इत्यस्य शब्दस्य विलोमपदं किम्?

क) अल्पज्ञः | ख) शिथिलः

ग) श्रेष्ठः | घ) बुद्धिहीनः

15) 'समतिक्रामत्सु' इत्यस्य शब्दस्य विशेष्यपदं किम्?

क) हितवादिनः | ख) फलेषु

ग) लतासु | घ) दिवसेषु

16) 'व्यवहारः' इत्यस्य शब्दस्य विशेषणपदं किम्?

क) अनाथः | ख) रूक्षः

ग) अश्रुधारा | घ) शिशवः